## विंशतित्रिंशद्भ्यां ड्वुनसञ्ज्ञायाम्। (२४/१६८९)

विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवति असञ्ज्ञायां विषये आर्हीयेष्वर्थेषु। विंशकः। त्रिंशकः। 'ति विंशतेर्डिति' (६. ४. १४२/८४४) इति तिलोपः। असञ्ज्ञायाम् इति किम्? विंशतिकः। त्रिंशत्कः। कथं पुनरत्र कन्, यावता अतिशदन्तायाः इति पर्युदासेन भवितव्यम् (म. भा. २. ३४७)? योगविभागः करिष्यते, [1]विंशतित्रिंशद्भ्यां कन् प्रत्ययो [2]भवति, ततो ड्वुनसञ्ज्ञायाम् (म. भा. २. ३४७) इति॥

## कंसाद् टिठन्। (२५/१६९०)

[3]कंसाद् टिठन् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। टकारो ङीबर्थः। इकार उच्चारणार्थः। नकारः स्वरार्थः। कंसिकः। कंसिकी।

[५०२] अर्धाच्चेति वक्तव्यम्। (म. भा. २. ३४७)

अर्धिकः। अर्धिकी।

[५०३] कार्षापणाद् टिठन् वक्तव्यः।

[4]कार्षापणिकः। कार्षापणिकी।

[५०४] [5]प्रतिशब्दश्चास्यादेशो वा वक्तव्यः।

प्रतिकः। प्रतिकी॥

## शूर्पादञन्यतरस्याम्। (२६/१६९१)

शूर्पशब्दादन्यतरस्याम् अञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। पक्षे सोऽपि भवति। शूर्पेण [6]क्रीतम् शौर्पम्, शौर्पिकम्॥

## शतमानविंशतिकसहस्रवसनादण्। (२७/१६९२)

शतमानादिभ्यः शब्देभ्यः अण् प्रत्ययो भवति आर्हीयेष्वर्थेषु। [7]ठक्ठञोरपवादः। शतमानेन क्रीतं शातमानं [8]शतम्। वैंशतिकम्। साहस्रम्। वासनम्[9]॥

---

1. विंशति त्रिंशत् इत्याभ्याम् क. 2. भवति नास्ति फ. 3. कंसशब्दात् ब. क. ड. फ. 4. नास्ति फ. 5. प्रति चास्यादेशो भवति क. 6. क्रीतः शौर्पः शौर्पिकः क. 7. ठञोऽपवादः ह. 8. शतम् नास्ति ब.क.ड.फ. 9. वासकम् इत्यधिकम ग.